हर हर शङ्कर ॐ जय जय शङ्कर








श्री-वेदव्यासाय नमः

## श्रीमद्-आद्य-शङ्कर-भगवत्पाद-परम्परागत-मूलाम्नाय-सर्वज्ञ-पीठम्
## श्री-काञ्ची-कामकोटि-पीठम्
## जगद्गुरु-श्री-शङ्कराचार्य-स्वामि-श्रीमठ-संस्थानम्

# वरलक्ष्मी-व्रतम्

**५१२८ पराभवः सिंहः ०५ २१.०८.२०२६**

(इयं पूजापद्धतिः ५०६४तमे कल्यब्दे १९६२तमे लौकिकाब्दे कामकोटिप्रदीप-पत्रिकायां प्रकाशितम् आधृत्य सज्जीकृता)

(विघ्नेश्वरपूजां कृत्वा)

ममोपात्तसमस्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं शुभे शोभने मुहूर्ते अद्य ब्रह्मणः द्वितीयपरार्धे श्वेतवराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे प्रथमे पादे जम्बूद्वीपे भारतवर्षे भरतखण्डे मेरोः दक्षिणे पार्श्वे अस्मिन् वर्तमाने व्यावहारिकाणां प्रभवादीनां षष्ट्याः संवत्सराणां मध्ये

**पराभव**-नाम-संवत्सरे **दक्षिणायने वर्ष**-ऋतौ **सिंह-श्रावण**-मासे **शुक्ल**-पक्षे **नवम्यां** शुभतिथौ **भृगु**वासरयुक्तायाम् **अनुराधा**-नक्षत्र (११:५०)युक्तायां **वैधृति**-योगयुक्तायां **बालव**-करण (१०:२६; **कौलव**-करण)युक्तायाम् एवं-गुण-विशेषण-विशिष्टायाम् अस्यां **नवम्यां**

शुभतिथौ मम सकुटुम्बायाः क्षेम-स्थैर्य-वीर्य-विजय-आयुः-आरोग्य-ऐश्वर्याणाम् अभिवृद्ध्यर्थम् आयुष्मत्-सत्-सन्तान-समृद्ध्यर्थं दीर्घ-सौमङ्गल्य-अवाप्त्यर्थं श्री-वरलक्ष्मी-प्रसाद-सिद्ध्यर्थं यथाशक्ति ध्यान-आवाहनादिभिः उपचारैः वरलक्ष्मी-पूजां

करिष्ये॥
(कलशपूजां कृत्वा)

## ध्यानम्

पद्मासनां पद्मकरां पद्ममालाविभूषिताम्।
क्षीरसागरसम्भूतां हेमवर्णसमप्रभाम्॥

क्षीरवर्णसमं वस्त्रं दधानां हरिवल्लभाम्।
भावये भक्तियोगेन कलशेऽस्मिन् मनोहरे॥
अस्मिन् कलशे वरलक्ष्मीं ध्यायामि। [कलशं पुष्पाक्षतैः अर्चयेत्।]

बालभानुप्रतीकाशे पूर्णचन्द्रनिभानने।
सूत्रेऽस्मिन् सुस्थिरा भूत्वा प्रयच्छ बहुलान् वरान्॥
[सूत्रं कलशे संयोजयेत्। पुष्पाक्षतैः अर्चयेत्।]

सर्वमङ्गलमाङ्गल्ये विष्णुवक्षःस्थलालये।
आवाहयामि देवि त्वामभीष्टफलदा भव॥
वरलक्ष्मीम् आवाहयामि।

अनेकरत्नखचितं क्षीरसागरसम्भवे।
स्वर्णसिंहासनं देवि स्वीकुरुष्व हरिप्रिये॥
वरलक्ष्म्यै नमः, आसनं समर्पयामि।

गङ्गादिसरिदानीतं गन्धपुष्पसमन्वितम्।
पाद्यं ददामि ते देवि प्रसीद परमेश्वरि॥
वरलक्ष्म्यै नमः, पाद्यं समर्पयामि।

गङ्गानदीसमानीतं सुवर्णकलशस्थितम्।
गृहाणार्घ्यं मया दत्तं पुत्रपौत्रफलप्रदे॥
वरलक्ष्म्यै नमः, अर्घ्यं समर्पयामि।

प्रसन्नं शीतलं तोयं प्रसन्नमुखपङ्कजे।
गृहाणाचमनार्थाय गरुडध्वजवल्लभे॥

वरलक्ष्म्यै नमः, आचमनीयं समर्पयामि।

महालक्ष्मि महादेवि मध्वाज्यदधिसंयुतम्।
मधुपर्कं गृहाणेमं मधुसूदनवल्लभे॥
वरलक्ष्म्यै नमः, मधुपर्कं समर्पयामि।

पयोदधिघृतैर्युक्तं शर्करामधुसंयुतम्।
पञ्चामृतं गृहाणेदं वरलक्ष्मि नमोऽस्तु ते॥
वरलक्ष्म्यै नमः, पञ्चामृतस्नानं समर्पयामि।

हेमकुम्भस्थितं स्वच्छं गङ्गादिसरिदाहृतम्।
स्नानार्थं सलिलं देवि गृह्यतां सागरात्मजे॥
वरलक्ष्म्यै नमः, स्नानं समर्पयामि।

दिव्याम्बरयुगं सूक्ष्मं कञ्चुकं च मनोहरम्।
वरलक्ष्मि महादेवि गृहाणेदं मयार्पितम्॥
वरलक्ष्म्यै नमः, वस्त्रं समर्पयामि।

माङ्गल्यमणिसंयुक्तं मुक्ताविद्रुमसंयुतम्।
दत्तं मङ्गलसूत्रं च गृहाण हरिवल्लभे॥
वरलक्ष्म्यै नमः, कण्ठसूत्रं समर्पयामि।

रत्नताटङ्ककेयूरहारकङ्कणभूषिते ।
भूषणानि महार्हाणि गृहाण करुणानिधे॥
वरलक्ष्म्यै नमः, आभरणानि समर्पयामि।

कर्पूरचन्दनोपेतं कस्तूरीकुङ्कुमान्वितम्।
सर्वगन्धं गृहाणाद्य सर्वमङ्गलदायिनि॥
वरलक्ष्म्यै नमः, गन्धान् धारयामि। हरिद्राकुङ्कुमं समर्पयामि।

शालिजातान् चन्द्रवर्णान् स्निग्धमौक्तिकसन्निभान्।
अक्षतान् देवि गृह्णीष्व पङ्कजाक्षस्य वल्लभे॥
वरलक्ष्म्यै नमः, अक्षतान् समर्पयामि।

मन्दारपारिजाताब्जैः केतक्युत्पलपाटलैः।
मल्लिकाजातिवकुलैः पुष्पैस्त्वां पूजयाम्यहम्॥
वरलक्ष्म्यै नमः, पुष्पाणि समर्पयामि।

# अङ्ग-पूजा

| | |
|---|---|
| वरलक्ष्म्यै नमः | पादौ पूजयामि |
| महालक्ष्म्यै नमः | गुल्फौ पूजयामि |
| इन्दिरायै नमः | जङ्घे पूजयामि |
| चण्डिकायै नमः | जानुनी पूजयामि |
| क्षीराब्धितनयायै नमः | ऊरू पूजयामि |
| पीताम्बरधारिण्यै नमः | कटिं पूजयामि |
| सागरसम्भवायै नमः | गुह्यं पूजयामि |
| नारायणप्रियायै नमः | नाभिं पूजयामि |
| जगत्कुक्ष्यै नमः | कुक्षिं पूजयामि |
| विश्वजनन्यै नमः | वक्षः पूजयामि |
| सुस्तन्यै नमः | स्तनौ पूजयामि |
| कम्बुकण्ठ्यै नमः | कण्ठं पूजयामि |
| सुन्दर्यै नमः | स्कन्धौ पूजयामि |
| पद्महस्तायै नमः | हस्तान् पूजयामि |
| बहुप्रदायै नमः | बाहून् पूजयामि |
| चन्द्रवदनायै नमः | वक्त्रं पूजयामि |
| चञ्चलायै नमः | चिबुकं पूजयामि |
| बिम्बोष्ठ्यै नमः | ओष्ठं पूजयामि |
| अनघायै नमः | अधरं पूजयामि |
| सुकपोलायै नमः | कपोलं पूजयामि |
| फलप्रदायै नमः | फालं पूजयामि |

| | |
|---|---|
| नीलालकायै नमः | अलकान् पूजयामि |
| शिवायै नमः | शिरः पूजयामि |
| सर्वमङ्गलायै नमः | सर्वाण्यङ्गानि पूजयामि |

# ॥ श्री-लक्ष्म्यष्टोत्तरशत-नामावलिः ॥

ॐ प्रकृत्यै नमः
ॐ विकृत्यै नमः
ॐ विद्यायै नमः
ॐ सर्व-भूत-हित-प्रदायै नमः
ॐ श्रद्धायै नमः
ॐ विभूत्यै नमः
ॐ सुरभ्यै नमः
ॐ परमात्मिकायै नमः
ॐ वाचे नमः
ॐ पद्मालयायै नमः १०
ॐ पद्मायै नमः
ॐ शुचये नमः
ॐ स्वाहायै नमः
ॐ स्वधायै नमः
ॐ सुधायै नमः
ॐ धन्यायै नमः
ॐ हिरण्मय्यै नमः
ॐ लक्ष्म्यै नमः
ॐ नित्य-पुष्टायै नमः
ॐ विभावर्यै नमः २०
ॐ अदित्यै नमः
ॐ दित्यै नमः
ॐ दीप्तायै नमः
ॐ वसुधायै नमः
ॐ वसु-धारिण्यै नमः
ॐ कमलायै नमः
ॐ कान्तायै नमः
ॐ कामायै नमः[1]
ॐ क्षीरोद-सम्भवायै नमः
ॐ अनुग्रह-प्रदायै नमः ३०
ॐ बुद्धये नमः
ॐ अनघायै नमः
ॐ हरि-वल्लभायै नमः
ॐ अशोकायै नमः
ॐ अमृतायै नमः
ॐ दीप्तायै नमः
ॐ लोक-शोक-विनाशिन्यै नमः
ॐ धर्म-निलयायै नमः
ॐ करुणायै नमः
ॐ लोक-मात्रे नमः ४०
ॐ पद्म-प्रियायै नमः
ॐ पद्म-हस्तायै नमः
ॐ पद्माक्ष्यै नमः
ॐ पद्म-सुन्दर्यै नमः

[1]पाठान्तरम् – कामाक्ष्यै नमः, क्रोध-सम्भवायै नमः

ॐ पद्मोद्भवायै नमः
ॐ पद्म-मुख्यै नमः
ॐ पद्मनाभ-प्रियायै नमः
ॐ रमायै नमः
ॐ पद्म-माला-धरायै नमः
ॐ देव्यै नमः ५०
ॐ पद्मिन्यै नमः
ॐ पद्म-गन्धिन्यै नमः
ॐ पुण्य-गन्धायै नमः
ॐ सुप्रसन्नायै नमः
ॐ प्रसादाभिमुख्यै नमः
ॐ प्रभायै नमः
ॐ चन्द्र-वदनायै नमः
ॐ चन्द्रायै नमः
ॐ चन्द्र-सहोदर्यै नमः
ॐ चतुर्भुजायै नमः ६०
ॐ चन्द्र-रूपायै नमः
ॐ इन्दिरायै नमः
ॐ इन्दु-शीतलायै नमः
ॐ आह्लाद-जनन्यै नमः
ॐ पुष्ट्यै नमः
ॐ शिवायै नमः
ॐ शिव-कर्यै नमः
ॐ सत्यै नमः
ॐ विमलायै नमः
ॐ विश्व-जनन्यै नमः ७०
ॐ तुष्ट्यै नमः
ॐ दारिद्र्य-नाशिन्यै नमः
ॐ प्रीति-पुष्करिण्यै नमः
ॐ शान्तायै नमः
ॐ शुक्ल-माल्याम्बरायै नमः
ॐ श्रियै नमः
ॐ भास्कर्यै नमः
ॐ बिल्व-निलयायै नमः
ॐ वरारोहायै नमः
ॐ यशस्विन्यै नमः ८०
ॐ वसुन्धरायै नमः
ॐ उदाराङ्गायै नमः
ॐ हरिण्यै नमः
ॐ हेम-मालिन्यै नमः
ॐ धन-धान्य-कर्यै नमः
ॐ सिद्ध्यै नमः
ॐ स्त्रैण-सौम्यायै नमः
ॐ शुभ-प्रदायै नमः
ॐ नृप-वेश्म-गतानन्दायै नमः
ॐ वर-लक्ष्म्यै नमः ९०
ॐ वसु-प्रदायै नमः
ॐ शुभायै नमः
ॐ हिरण्य-प्राकारायै नमः
ॐ समुद्र-तनयायै नमः
ॐ जयायै नमः
ॐ मङ्गलायै देव्यै नमः
ॐ विष्णु-वक्षः-स्थल-स्थितायै नमः
ॐ विष्णु-पत्न्यै नमः
ॐ प्रसन्नाक्ष्यै नमः
ॐ नारायण-समाश्रितायै नमः १००
ॐ दारिद्र्य-ध्वंसिन्यै नमः
ॐ देव्यै नमः


9884655618 8072613857 vdspsabha@gmail.com vdspsabha.org

ॐ सर्वोपद्रव-हारिण्यै नमः
ॐ नव-दुर्गायै नमः
ॐ महा-काल्यै नमः
ॐ ब्रह्म-विष्णु-शिवात्मिकायै नमः
ॐ त्रि-काल-ज्ञान-सम्पन्नायै नमः
ॐ भुवनेश्वर्यै नमः १०८

॥ इति श्री-लक्ष्म्यष्टोत्तरशत-नामावलिः सम्पूर्णा ॥

धूपं ददामि ते रम्यं गुग्गुल्वगरुसंयुतम्।
गृहाण त्वं महालक्ष्मि भक्तानामिष्टदायिनि॥
वरलक्ष्म्यै नमः, धूपम् आघ्रापयामि।

साज्यं त्रिवर्तिसंयुक्तं सर्वाभीष्टप्रदायिनि।
दीपं गृहाण कमले देहि मे सर्वमीप्सितम्॥
वरलक्ष्म्यै नमः, दीपं सन्दर्शयामि।

नानाभक्ष्यसमायुक्तं नानाफलसमन्वितम्।
नैवेद्यं गृह्यतां देवि नारायणकुटुम्बिनि॥
वरलक्ष्म्यै नमः, नैवेद्यं निवेदयामि।

उशीरवासितं तोयं शीतलं शशिसोदरि।
पानाय गृह्यतां देवि पारावारतनूभवे॥
वरलक्ष्म्यै नमः, पानीयं समर्पयामि।

पूगीफलं सकर्पूरं नागवल्लीदलानि च।
चूर्णं च चन्द्रसहजे गृह्यतां हरिवल्लभे॥
वरलक्ष्म्यै नमः, ताम्बूलं निवेदयामि।

नीराजनं नीरजाक्षि नारायणविलासिनि।
गृह्यतामर्पितं भक्त्या गरुडध्वजभामिनि॥
वरलक्ष्म्यै नमः, मम दीर्घसौमङ्गल्य-सिद्ध्यर्थं कर्पूर-नीराजनं सन्दर्शयामि। रक्षां धारयामि।

पुष्पाञ्जलिं गृहाणेमं पुरुषोत्तमवल्लभे।
वरलक्ष्मि नमस्तुभ्यं वरान् देहि ममाखिलान्॥

वरलक्ष्म्यै नमः, मन्त्रपुष्पं समर्पयामि।

सर्वमङ्गललाभाय सर्वपापनिवृत्तये।
प्रदक्षिणं करोम्यद्य प्रसीद परमेश्वरि॥
वरलक्ष्म्यै नमः, प्रदक्षिणं करोमि।

नमोऽस्तु नालीकनिभाननायै
नमोऽस्तु नारायणवल्लभायै।
नमोऽस्तु रत्नाकरसम्भवायै
नमोऽस्तु लक्ष्म्यै जगतां जनन्यै॥
वरलक्ष्म्यै नमः, नमस्कारान् समर्पयामि।

आयुरारोग्यमैश्वर्यं पुत्रपौत्रान् पशून् धनम्।
शत्रुक्षयं महालक्ष्मि प्रयच्छ करुणानिधे॥
वरलक्ष्म्यै नमः, प्रार्थनां समर्पयामि।

## सूत्रग्रन्थिपूजा

Do puja to the nine knots on the sutra

कमलायै नमः, प्रथमग्रन्थिं पूजयामि।
रमायै नमः, द्वितीयग्रन्थिं पूजयामि।
लोकमात्रे नमः, तृतीयग्रन्थिं पूजयामि।
विश्वजनन्यै नमः, चतुर्थग्रन्थिं पूजयामि।
महालक्ष्म्यै नमः, पञ्चमग्रन्थिं पूजयामि।
क्षीराब्धितनयायै नमः, षष्ठग्रन्थिं पूजयामि।
विश्वसाक्षिण्यै नमः, सप्तमग्रन्थिं पूजयामि।
चन्द्रसहोदर्यै नमः, अष्टमग्रन्थिं पूजयामि।
हरिवल्लभायै नमः, नवमग्रन्थिं पूजयामि।

Shloka for taking the sutra in the hand

सर्वमङ्गलमाङ्गल्ये सर्वपापप्रणाशिनि।
दोरकं प्रतिगृह्णामि सुप्रीता भव सर्वदा॥

Shloka for tying the sutra on the right hand

नवतन्तुसमायुक्तं नवग्रन्थिसमन्वितम्।
बध्नीयां दक्षिणे हस्ते दोरकं हरिवल्लभे॥
इति दोरकं बध्नीयात्।

# अर्घ्यम्

ममोपात्त-समस्त-दुरित-क्षयद्वारा श्री-वरलक्ष्मी-प्रीत्यर्थं वरलक्ष्मीपूजान्ते क्षीरार्घ्यप्रदानं करिष्ये॥

गोक्षीरेण युतं देवि गन्धपुष्पसमन्वितम्।
अर्घ्यं गृहाण वरदे वरलक्ष्मि नमोऽस्तु ते॥
श्री-वरलक्ष्म्यै नमः, इदमर्घ्यम्, इदमर्घ्यम्, इदमर्घ्यम्।

# उपायनदानम्

For the puja to be fruitful, give upachara-s such as asana and dakshina to the upadhyaya.

वरलक्ष्मीस्वरूपस्य ब्राह्मणस्य इदमासनम्। सकलाराधनैः स्वर्चितम्। अनुष्ठितायाः वरलक्ष्मीपूजायाः साद्गुण्य-सिद्ध्यर्थं सम्पूर्ण-साङ्ग-फल-सिद्ध्यर्थं च इदम् उपायनं सदक्षिणाकं सताम्बूलं वरलक्ष्मीस्वरूपाय ब्राह्मणाय सम्प्रददे, न मम॥

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वा प्रकृतेः स्वभावात्।
करोमि यद्यत् सकलं परस्मै
नारायणायेति समर्पयामि॥
शुभम्॥


9884655618 8072613857 vdspsabha@gmail.com vdspsabha.org

# कथा [भविष्योत्तरपुराणम्]

## सूत उवाच

कैलासशिखरे रम्ये नानागणनिषेविते।
मन्दारपीठे विद्रान्ते नानामणिविभूषिते॥ १॥

रत्नपीठे सुखासीनं शङ्करं लोकशङ्करम्।
पप्रच्छ गौरी सन्तुष्टा परानुग्रहकाम्यया॥ २॥

## पार्वत्युवाच

भगवन् सर्वलोकेश सर्वभूतहिते रत।
यद्रहस्यमिदं पुण्यं तदाचक्ष्व ममानघ॥ ३॥

वरलक्ष्मीव्रतं चास्ति तन्मे ब्रूहि जगत्प्रभो।

## शङ्कर उवाच

व्रतानामुत्तमं नाम सर्वसौभाग्यदायकम्॥ ४॥

सर्वसम्पत्करं शीघ्रं पुत्रपौत्रप्रवर्धनम्।
शुक्ले श्रावणके मासे पौर्णिमास्यां तु भार्गवे।
तदारभ्य व्रतं नार्या महालक्ष्मीं च पूजयेत्॥ ५॥

## पार्वत्युवाच

विधिना केन कर्तव्यं तत्र का नाम देवता।
कथमाराधिता पूर्वं साभूत् सन्तुमनेनसा॥ ६॥

## ईश्वर उवाच

वरलक्ष्मीव्रतं पुण्यं वक्ष्यामि शृणु पार्वति।
कथं त्वं च चकोरोक्षितदधीना भविष्यसि॥ ७॥

कौण्डण्य नाम नगरे सर्वमण्डनमण्डिते।
हेमप्राकारसहिते चामीकरगृहेज्वले॥ ८॥

तत्र सा ब्राह्मणी काचिच्चारुनामेति विश्रुता।
पतिभक्तिरता साध्वी श्वश्रूश्वशुरयोर्मता।
कलानिधिसमारूपा सततं मञ्जुभाषिणी॥ ९॥

तस्याः प्रसन्नचित्तेन लक्ष्मीः स्वप्नङ्गता तदा।
एहि कल्याणभद्रं ते वरलक्ष्मीप्रसादतः॥ १०॥

नभोमासे पौर्णिमास्यां नातिक्रान्ते भृगोर्दिने।
आरब्धव्यं व्रतं तत्र महालक्ष्म्या यतात्मभिः॥ ११॥

सुवर्णप्रतिमां कुर्याच्चतुर्भुजसमन्विताम्।
पूर्वगृहमलङ्कृत्य तोरणै रङ्गवल्लिकैः॥ १२॥

तद्दिने भार्गवे वारे नवभाण्डसमन्वितम्।
गृहं च पूर्वदिग्भागे ईशान्यां च विशेषतः॥ १३॥

गोधूमान् प्रस्थसङ्ख्याकान् भूमौ निक्षिप्य पूजयेत्।
संस्थाप्य कलशं तत्र तन्दुलैर्वाससा भरेत्॥ १४॥

पुष्पाणि च विनिक्षिप्य सुवर्णं प्रक्षिपंस्ततः।
पल्लवांश्च विनिक्षिप्य वस्त्रेणाऽऽच्छाद्य यत्नतः॥ १५॥

प्रतिमांस्थापयेत् तत्र पूजयंश्च यथाविधि।
पञ्चामृतेन स्नपनं कारयेन्मन्त्रितः सुधीः॥ १६॥

शुद्धस्नानं ततः कृत्वा देवीसूक्तेन वै ततः।
अष्टगन्धैः समभ्यर्च्य पल्लवांश्च समर्पयेत्॥ १७॥

अश्वत्थवटविल्वादिचूतदाडिममल्लिकाः।
तुलसी करवीरैश्च केतकैश्चम्पकैस्तथा॥ १८॥

एतेषां पत्रमादाय एकविंशतिसङ्ख्यया।
नानाविधानि पुष्पाणि मालत्यादीनि वै ततः॥ १९॥

धूपदीपैर्महालक्ष्मीं पूजयेत् सर्वकामदाम्।
पायसं सर्वमन्नञ्च सर्वभक्ष्येश्चसंयुतम्॥ २०॥

एकविंशतिसङ्ख्याकैरपूपैश्च न्यवेदयेत्।
पुनः पञ्चैवते तत्र लक्ष्म्यर्थं तु विनिक्षिपेत्॥ २१॥

उपचारैर्बहुविधैर्नानासन्मानकैस्तथा ।
देव्यै सर्वं समर्प्याथ वरमिष्टं च याचयेत्॥ २२॥

नृत्यगीतादिसहितं देवीं सम्प्रार्थयेच्छ्रियम्।
उमा सरस्वती धात्री शची च प्रियवादिनि॥ २३॥

एताभिश्च कृतं सम्यग् व्रतं सर्वसमृद्धिदम्।
मत्पूजा तत्र कर्तव्या वरं दास्यामि काङ्क्षितम्॥ २४॥

**चारुमतिरुवाच**

नमामि वरलक्ष्मीं त्वामागतां परमेश्वरीम्।
नमस्ते सर्वलोकानां जनन्यै पुण्यमूर्तये॥ २५॥

शरण्ये त्रिजगद्वन्द्ये विष्णुवक्षस्थलस्थिते।
त्वया विलोकिता प्रीत्या मुक्ता सा सद्यः सङ्कटात्॥ २६॥

जन्मान्तरसहस्रेषु किं मया सुकृतं कृतम्।
यतस्त्वत्पादयुगुलं पश्यामि हरिवल्लभे॥ २७॥

एवं स्तुता सा कमला प्रहास्य च बहुन् वरान्।
दत्वा चारुमतिस्तत्र स्वप्नादुत्थाय साक्षगात्॥ २८॥

तत्सर्वं कथयामास बन्धूनां पुरतस्तथा।
श्रुत्वा ते बान्धवः सर्वे साधु साध्विति चाब्रुवन्॥ २९॥

तथैव करवामेति तदागमनकाङ्क्षिणी।
भाग्योदये न सम्प्राप्तं वरलक्ष्मीदिनं तदा॥ ३०॥

स्त्रियः प्रसन्नवदना निर्मलाश्चित्रवाससः।
नूतने तन्दुलैः पूर्णे कुम्भे च पदवल्लभे॥ ३१॥

पद्मासने पद्मकरे सर्वलोकैकपूजिते।
नारायणप्रिये देवि सुप्रीता भव सर्वदा॥ ३२॥

मन्त्रेणानेककलशे उपचाराननुक्रमैः।
त्यक्त्वा च दक्षिणे हस्ते वरसुत्रं ददुः श्रियः॥ ३३॥

अन्नदानरता नित्यं बन्धुपोषणतत्परा।
पुत्रपौत्रैः परिवृता धनधान्यसमन्विता॥ ३४॥

ततो देवीसमीपे तु तिष्ठती कृतमङ्गला।
शिवदेव्यः प्रसादेन मुक्ताहारविभूषिता॥ ३५॥

स्वपदं समयाजग्मुर्हत्त्यश्वरथसङ्कुला।
अन्योन्याः कथयामास प्रीत्या चारुमतिस्तदा॥ ३६॥

इदं गुह्यमिदं सत्यं नरो भद्राणि पश्यति।
स्वयं चारुमतिर्मुख्यानुपलब्ध्या मनोरथान्॥ ३७॥

पूज्या चारुमतिश्चैव भूत्वा भाग्यवतीश्चिरम्।
एषा चारुमती साध्वी दृष्टा सा मित्रयोषिताम्॥ ३८॥

इह मानुषलोके हि व्रतं कार्यं सुविस्तरम्।
व्रतं पुण्यकरं चैव कुर्याद् भक्तिपुरःसरम्॥ ३९॥

भक्त्या करोति विपुलान्।
भोगान् प्राप्य श्रियं व्रजेत्॥ ४०॥

व्रतानामुत्तमं पुण्यं वरलक्ष्मीव्रतं शुभम्।
तत्कृतेन नरो नारी पश्चां स्वर्गं गमिष्यति॥ ४१॥

य इदं श‍ृणुयान्नित्यं वाचयेद् वा समाहितः।
धनधान्यं समाप्नोति वरलक्ष्मीप्रसादतः॥ ४२॥

॥ इति श्रीभविष्योत्तरपुराणे ईश्वरपार्वतीसंवादे वरलक्ष्मीव्रतकथा समाप्ता॥